Total Pages—6 **PG/IIIS/SAN/303(A, B & C)/23**
**(New)**

# M.A. 3rd Semester Examination, 2023

## SANSKRIT

PAPER – SAN-303(A, B & C)

*Full Marks* : 50

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

## PAPER – SAN-303 (A)

( *Literature* )

(सर्वेषामुत्तरं संस्कृतेन नागर्या च प्रदेयम् )

1. प्रश्नद्वयं समाधेयम् — 10 × 2

(क) भरतस्य रससूत्रं किम् ? अभिनवगुप्तदिशा सुत्रमिदम् आलोच्यताम् ।

*अथवा*

गुणीभूतव्यङ्ग्यं कति विधम् ? कानि च तानि ? तेषु यथेच्छं द्वयोः स्वरूपं सोदाहरणं व्याख्यायन्ताम् ।

(ख) जगन्नाथसम्मतं काव्यकारणमालोच्यताम् ।

*अथवा*

जगन्नाथमते काव्यं कतिविधम् ? कानि च तानि ? तेषु प्रथमकाव्यस्वरूपं समुपवर्ण्यताम् ।

**2.** द्वयोर्व्याख्या कार्या — 5 × 2

(क) व्यक्त स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ।

(ख) रतिर्देवादिविषया व्यभिचारी तथञ्जितः ।

(ग) यस्यासुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचीव्यधव्यतिकरेण युनक्ति कर्णौ ।
काञ्जीगुणग्रथनभाजनमेष सोऽस्मि
जीवन्न सम्प्रति भवामि किमावहामि ।।

3. द्वयोर्व्याख्या कार्या — 5 × 2

(क) एतेन विनिगमनाभावादुभयत्र शक्तिरिति प्रत्युक्तम् ।

(ख) यत्तु रसवदेव काव्यमिति साहित्यदर्पणे निर्णीतं, तन्न ।

(ग) यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम् ।

**[ Internal Assessment – 10 Marks ]**

## PAPER – SAN-303(B)

( *Pāninian Grammar* )

(**सर्वे** प्रश्नाः संस्कृतेन नागर्या च समाधेयाः )

1. प्रश्नद्वयं समाधेयम् — 10 × 2

(क) 'यथोद्देशं संज्ञापरिभाषम्' इति परिभाषा नागेशदिशा व्याख्यायताम् ।

*अथवा*

'उभयगतिरिह भवति' इत्यस्य कोऽर्थः ? अस्याः ज्ञापकं किम् ? तत्र कृत्रिमाकृत्रिमन्यायः कथं दूषितं भवति ? सर्वमेतत् परिभाषेन्दुशेखरमाश्रित्य आलोच्यताम् ।

(*ख*) व्याकरणशास्त्रे कौण्डभट्टस्य परिचयः प्रदेयः ।

*अथवा*

क्रियास्वरूपं भूषणसारमवलम्ब्य व्याख्यायताम् ।

**2.** द्वयोर्व्याख्या कार्या — 5 × 2

(*क*) व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ।

(*ख*) नानुबन्धकृतमसारूप्यम् ।

(*ग*) अर्थवद्ग्रहणे नानर्थकस्य ।

**3.** द्वयोर्व्याख्या कार्या — 5 × 2

(*क*) श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद् विवर्तते ।।

(*ख*) कृत्रोऽकर्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते ।

(*ग*) निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते ।
न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः ।।

**[ Internal Assessment – 10 Marks ]**

## PAPER — SAN-303(C)

### ( *Indian Philosophy* )

(सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः )

### विभाग — क

1. एकः प्रश्नः समाधेयः — 10 × 1

   (क) सांख्यमतानुसारं कैवल्य स्वरूपम् आलोच्यताम् ।

   (ख) सांख्यसम्मतं सृष्टितत्त्वं व्याख्यायताम् ।

2. द्वयोर्व्याख्या कार्याः — 5 × 2

   (क) युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।
   दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ।।

   (ख) अन्तः करणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।
   साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ।।

   (ग) पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम् ।
   संसरति निरूपभोगं भावैरधिवासितं लिङ्गम् ।।

## विभाग — ख

**3.** एकः प्रश्नः समाधेयः — 10 × 1

(क) योगसारसंग्रहानुसारेण योगस्य स्वरूपं निरूपणीयम् ।

(ख) योगसारसंग्रहानुसारेण चित्तवृत्तीनां स्वरूपं निरूप्यताम् ।

**4.** द्वयोः टीका लेख्या — 5 × 2

(क) भवप्रत्ययः

(ख) अभ्यासः

(ग) ईश्वरः ।

**[ Internal Assessment – 10 Marks ]**